## षोडशः पाठः

# सान्ध्यवर्णनम्

'गद्यं कवीनां निकषं वदन्ति' इत्युक्त्या गद्यस्य वैशिष्ट्यं प्रतीयते। प्राक्तनगद्यकारेषु बाणभट्टः सर्वाधिकः समादृतः। तेन विरचितं 'हर्षचरितम्' तस्य पाण्डित्यं द्योतयति। रचनायामस्यां राज्ञः हर्षस्य चरित्रं चित्रितम्।

पाठेऽस्मिन् हर्षचरितस्य प्रथमोच्छ्वासतः उद्धृतोऽयमंशः लेखकस्य प्रकृत्यनुरागं प्रकटयति। अंशेऽस्मिन् सान्ध्यसुषमायाः सजीवं वर्णनमस्ति।

क्रमेण च मन्दायमाने मुकुलितविसिनीविसरव्यसनविषण्णसरसि वासरे, प्रस्नुतमुखमाहेयीयूथक्षरत्क्षीरधारा-धवलितेष्वासन्नचन्द्रोदयोद्दामक्षीरोदलहरीक्षालितेष्विव दिव्याश्रमोपशल्येषु, अपराह्णप्रचारचलिते चामरिणि चामीकर-तटताडनरणितरदने रदति सुरस्रवन्तीरोधांसि स्वैरमैरावते प्रसृतानेकविद्याधराभिसारिकासहस्रचरणालक्तकरसानुलिप्त इव प्रकटयति च तारापथे पाटलताम्, तारापथ-प्रस्थित सिद्धदत्तदिनकरास्तमयार्घ्यावर्जिते रञ्जितककुभि, कुसुम्भभासि स्रवति पिनाकिप्रणतिमुदितसन्ध्यास्वेदसलिल इव रक्तचन्दनद्रवे, वन्दारुमुनिवृन्दारकवृन्दबध्यमानसन्ध्याञ्जलिवने, ब्रह्मोत्रोत्पत्तिकमलसेवागतसकलकमलाकर इव राजति ब्रह्मलोके, समुच्चारिततृतीयसवनब्रह्मणि ब्रह्मणि, ज्वलित वैतानज्वलनज्वालाजटालाजिरेष्वारब्धधर्मसाधनशिबिरनीराजनेष्विव सप्तर्षिमन्दिरेषु, अघमर्षणमुषित किल्बिष-विषगदोल्लाघलघुषु यतिषु सन्ध्योपासनासीनतपस्विपङ्क्तिपूतपुलिने प्लवमाननलिनयोनियानहंसहासदन्तुरितोर्मिणि मन्दाकिनीजले, जलदेवतातपत्रे पत्ररथकुलकलत्रान्तःपुरसौधे निजमधुमधुरामोदिनि कृतमधुपमुदि मुमुदिषमाणे कुमुदवने, दिवसावसानताम्यत्तामरसमधुरमधुसपीतिप्रीते सुषुप्सति मृदुमृणालकाण्डकण्डूयनकुण्डलितकन्धरे धुतपत्रराजिवीजित राजीवसरसि राजहंसयूथे, तटलताकुसुमधूलिधूसरितसरिति सिद्धपुरपुरंध्रिधम्मिल्लमल्लिकागन्धग्राहिणि सायंतने तनीयसि निशानिश्वासनिभे नभस्वति, नृत्योद्धूतधूर्जटिजटाटवीकुटजकुड्मलनिकरनिभे नभस्तलं स्तबकयति तारागणे, सन्ध्यानुबन्धताम्रे परिणमत्तालफलत्वक्त्विषि कालमेघमेदुरे, मेदिनीं मीलयति नववयसि तमसि तरुणतरतिमिरपटलपाटनपटीयसि समुन्मिषति यामिनीकामिनीकर्णपूरचम्पककलिकाकदम्बके प्रदीपप्रकरे।

### शब्दार्थः

| | | |
|---|---|---|
| विसिनी | – | कमलिनी |
| प्रस्नुतमुख | – | आर्द्रमुख (गीला मुँह) |
| माहेयी | – | गौ |
| यूथः | – | समूहः |
| क्षरत् | – | पतत् (टपकते हुए) |
| क्षीरधारा | – | दुग्धधारा (दूध की धारा) |
| उद्दामः | – | प्रवृद्धिं गतः (बढ़ी) |

| | | |
|---|---|---|
| क्षीरोदलहरीक्षालितेषु | – | क्षीरसागरोद्भूततरङ्गप्रक्षालितेषु (क्षीरसागर से उत्पन्न लहरों द्वारा प्रक्षालित) |
| दिव्याश्रमोपशल्येषु | – | सुन्दराश्रमसमीपेषु (सुन्दर आश्रम के पास) |
| चामरिणि | – | चामरधारी (चँवर धारण किए हुए) |
| चामीकर | – | स्वर्ण |
| रणितरदने | – | दन्तध्वनिसहिते (दाँतों की किट किटाहट) |
| रदति | – | विलिखति (लिखता है) |
| सुरस्रवन्ती | – | गङ्गानदी |
| रोधांसि | – | तटांसि (किनारे) |
| स्वैरम् | – | स्वैच्छम् (स्वेच्छापूर्वक) |
| ऐरावते | – | इन्द्रस्य हस्तिनि (ऐरावत नामक इन्द्र के हाथी पर) |
| प्रसृत | – | विस्तृत (फैली) |
| पाटलताम् | – | रक्तवर्णताम् (लालरङ्ग को) |
| तारापथः | – | नभः (आकाश) |
| रञ्जित | – | रक्तिम् (लालवर्ण) |
| ककुभि | – | दिशि (दिशाओं में) |
| कुसुम्भभासि | – | पद्मप्रतिभासि (कमल के समान दिखाई देने वाला) |
| पिनाकी | – | शिवः (भगवान् शङ्कर) |
| प्रणति | – | प्रणामं करोति (प्रणाम करता है) |
| वन्दारु | – | वन्दनशीलम् (वन्दना के लिए तत्पर) |
| वृन्दारक | – | प्रशंसावाची शब्दः (प्रशंसार्थक शब्द) |
| वृन्दः | – | समूहः |
| राजति | – | सुशोभते (सुशोभित होता है) |
| तृतीयसवन | – | त्रिकालसन्ध्या (प्रातः, मध्याह्न, और सायंकालीन सन्ध्या) |
| वैतानज्वलनज्वाला | – | यज्ञे प्रज्वलितज्वाला (यज्ञ में प्रज्ज्वलित की जाने वाली अग्नि) |
| जटाला | – | पूर्णानि (पूर्ण) |
| अजिराणि | – | प्राङ्गणानि (प्राङ्गण) |
| आरब्धधर्मसाधनशिबिरे | – | प्रारम्भधर्मसाधनाशिबिरे (धर्म साधना शिविर में आरम्भ) |
| नीराजनेषु | – | आरार्तिकेषु (आरती नामक शान्ति कर्म में) |
| अघमर्षणमुषित | – | अघमर्षणनामकमन्त्रस्य जपः (पापनाशक अघमर्षण नामक मन्त्र के जप से) |

| | |
|---|---|
| किल्बिष | – पाप |
| बिषगद | – विषाक्तरोगः (विष से परिपूर्ण रोग) |
| उल्लाघलघुषु | – समाप्तप्रायेषु (समाप्त प्रायः) |
| प्लवमान | – तरणशीलः (तैरते हुए) |
| नलिनयोनियान | – ब्रह्मणः वाहनम् (ब्रह्मा का वाहन हंस) |
| हासदन्तुरितः | – प्रकटितहासः (हँसी) |
| उर्मिणि | – तरङ्गे |
| आतपत्रे | – कमलपत्रे (कमल के पत्ते पर) |
| पत्ररथ | – पक्षिणः (पक्षी) |
| अन्तःपुरसौधे | – अन्तः पुरप्रासादे (महल में स्त्रियों के रहने का स्थान) |
| मुमुदिषमाणे | – विचकिसिषति (लब्धानन्द) |
| सुषुप्सति | – निद्रासति (सो जाने पर) |
| कण्डूयन् | – खर्जनक्रियां कुर्वन् (खुजलाते हुए) |
| कुण्डलितकन्धरे | – चक्रीकृतकन्धरे (कन्धा, गर्दन घुमाये) |
| वीजित | – व्यजनमिवकारितम् (फड़फड़ाना) |
| पुरन्ध्रि | – स्त्री |
| मल्लिका | – भूपदी (मल्लिका लता) |
| सायंतने | – दिनान्ते (सायङ्काल में) |
| तनीयसि | – मन्दायमानः (मन्द गति) |
| निशानिश्वासनिभे | – रात्रिश्वासवत् (रात्रि की साँस के समान) |
| नभस्वति | – आकाशे (आकाश में) |
| धूर्जटिः | – शिवः (भगवान् शङ्कर) |
| जटाटवी | – जटाविपिनम् (जटाओं का वन) |
| कुटजम् | – गिरिमल्लिका (मल्लिका लता का ढेर) |
| स्तबकयति | – गुच्छवद् भवति (गुच्छे जैसी हो रही है) |
| मेदुरम् | – घनम् (बादल को) |
| मीलयति | – स्थगयति (स्थगित करता है) |
| नववयसि | – यौवनारम्भे (युवावस्था में) |
| यामिनी कामिनी | – रात्रि रूपी स्त्री |
| कर्णपूर | – कर्णाभरणम् (कनफूल) |

## अभ्यासः

**1. एकपदेन उत्तरत –**

(क) क्रमेण कः मन्दायमानः?

(ख) ब्रह्मोत्पत्तिकमलं कुत्र राजति?

(ग) ऐरावतः कः अस्ति?

(घ) चरणालक्तकं तारापथे किं प्रकटयति?

(ङ) कस्य मन्त्रस्य जपेन यतयः स्वस्थाः अभवन्?

**2. एकवाक्येन उत्तरत –**

(क) अञ्जलिसमूहयुक्तः कमलसमूहः कथं राजति?

(ख) भ्रमराः कुत्र विश्राममकुर्वन्?

(ग) तारागणः कं स्तबकयति?

(घ) यामिनीकामिनीकर्णाभरणं किम्?

(ङ) ब्रह्मणः वाहनं किमस्ति?

**3 त्रिचतुर्भिर्वाक्यैः उत्तरत –**

(क) सरोवरः किमर्थं दुःखितः?

(ख) आकाशः कीदृशः रक्तवर्णः?

(ग) मन्दाकिन्याः जलं कथमस्ति?

(घ) मेदिनी केन कथञ्च आच्छादिता?

(ङ) राजहंसाः कथम् प्रसन्नाः?

**4 उचितं योजयत–**

| | **( अ )** | **( ब )** |
|---|---|---|
| (क) | प्रस्नुतमुखमाहेयीयूथ | सुरस्रवन्तीरोधांसि रदति |
| (ख) | ऐरावतः | क्षरत्क्षीरधारा |
| (ग) | चरणालक्तकरसानुलिप्त इव | धूर्जटिजटाटवी |
| (घ) | कुसुम्भभासि | तारापथे पाटलताम् प्रकटयति |
| (ङ) | नृत्योद्धूतः | रक्तचन्दनद्रवः स्रवति |

**5 नामोल्लेखपूर्वकं सन्धिविग्रहं कुरुत-**

(क) नृत्योद्धूतः

(ख) क्षालितेष्विव

(ग) स्वैरमैरावते

(घ) सन्ध्योपासना

(ङ) सप्तर्षिः

**6. क्रमानुसारं वाक्यानि लिखत-**

(क) ऐरावतः सायङ्काले भ्रमणार्थं निर्गतः।

(ख) क्रमेण च मन्दायमानः वासरः।

(ग) कुसुम्भभासि रक्तचन्दनद्रवः स्रवति।

(घ) सप्तर्षिमन्दिरेषु ज्वलितवैतानज्वलनज्वालाजटालानि।

(ङ) अन्धकारः मेदिनीं मीलयति।

(च) भ्रमराः कमलकोशे विश्रामं कुर्वन्ति।

**7. अधोलिखितानां पदानां पर्यायवाचीशब्दं लिखत-**

(क) वासरे

(ख) माहेयी

(ग) विसिनी

(घ) चामीकरः

(ङ) ककुभि

(च) तारापथः

(छ) वृन्दः

(ज) जटालानि

(झ) उर्मिणि

(ञ) पत्ररथः

7 **अधोलिखितानां पदानां विलोमशब्दं लिखत-**

| | | |
|---|---|---|
| (क) | अपराह्नः | – |
| (ख) | पापम् | – |
| (ग) | निशा | – |
| (घ) | निश्वासः | – |
| (ङ) | तमः | – |
| (च) | पूतः | – |
| (छ) | अस्तम् | – |
| (ज) | धवलः | – |
| (झ) | सुरः | – |
| (ञ) | अनेकः | – |

8. **''प्रसृतानेकविद्याधर..........तारापथे पाटलताम्'' इत्यस्य भावसौन्दर्यं लिखत।**

9. **''सान्ध्यवर्णनम्'' इति पाठस्य सारांशं लिखत।**

10. **''सान्ध्यवेला'' इति विषयमवलम्ब्य दशवाक्यानि रचयत।**

## योग्यताविस्तारः –

- बाणभट्टस्य जीवनपरिचयं पठन्तु।
- बाणभट्टस्य रचनानां सूचीनिर्माणं कुरुत।
- हर्षचरितस्य विषये अवगच्छन्तु।